A.C. Joshi Library
P.U. Chandigarh

MSS No. 157 Subject Religion

Name of MSS अध्यात्म रामायण बालकाण्ड

Author — —

Period n. d. Folios 045 (002 to 046)

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 001

157

(3)

157

श्री
प्र रा
बा टी
१

ॐ श्रीगणेशाय नमः ॥ विसेनवंशाजयौभूषणः शीतकरोपरः स्वाह्लादको विलसभूषणः कै
लभोपरः प्रत्रविलसभूषणस्त्वेनपरमभक्ततया सदाभगवहृदयाह्लादितास्पधनिता १ नाम्ना
हिम्मतिर्माभूद्धैर्येणहिमवानिव रूपेणजितकंदर्पः तमयौदामयास्तमः २ पराक्रमेणेन्द्रा
नःसाक्षात्तेजसाभानुमानिव भूपानांभ्रष्टराज्यानांपुनः राज्यप्रदायकः ३ यंदृष्ट्वार्थिमू
हस्य जातेयंतिश्चिंतामतिः हित्वापश्चुतंत्रीत्वंचकामधुक्भूमिमागता ४ तस्माज्जाता
रामदत्तुंद्राश्चादिद्रवापरः मित्राणांचविमूर्णांचमानदः प्रथितःप्रभुः ५ मा
नदमानदातामानखेडकस्सनसदा श्रीसमृद्धंतमादेवीयत्कीर्त्याधवली
कृता हिमाचलस्यसमतांनीताःसमापिचाचलाः ६ यद्भानो
र्भुप्रबाहुग्गमेचोदस्यानपेत्तकाः कृषीबलाःप्रतिदि
नंप्रहृष्यंतिदिनंदिनं ७ तेनश्रीरामभक्तेनसर्वावि
द्याःप्रजानता श्रृंगवेरपुरेशेनरिपुकक्षदवाग्नि
ना ८ प्रार्थिताकल्पहृद्येणविद्वज्जनसभासदा भ
हनारोमाभिधेनाबध्येतेरामवर्सणा ९ प्रणा
म्यजानकीजानिंरामंकामातिसुंदरं चापबाण
धरंदेवंमायामानुषविग्रहम् १० ॥ रामः ॥

१

सेतुः परोपकृतये ध्यात्मरामायणांबुधौ स्वबाहुमालिभिः सद्भौः प्रोयतां तेन राघवः ॥ श्रीम
तावाल्मीकिनालोकोद्धारायचकृते रामचरित्रवर्णनरूपेणरामायणाख्यकाव्येनभगवतोली
लावतारस्यरामस्यरावणादीनांदुष्टमनुष्याणांबुद्ध्यैनदवदात्मस्वरूपगोपतेनव्यवहृतं स्वरूपंवाल्मी।
किनाशुभ्रमेवतत्त्वतत्रनिरूपितेतदेनतत्त्वमदयालभगवान्माहाहेदव्यासोलोकानांस्फुटबोधयितुंना
रदब्रह्मसंवादरूपेणब्रह्मांडपुराणेऽध्यात्मरामायणाख्यसंहिताचक्रे तस्याश्चवाल्मीकिसूचितार्थस्ता
पकत्वंबोधयितुंवाल्मीकिरामायणवदेवकांडसर्गोयेततांकृतवान् तांयथामतिस्वमतिदोषस्य

ॐ श्रीगुरुमूर्तयेनमः ॥ ॐ अप्रमेयत्रयातीतनिर्मलज्ञानमूर्तये मनोगिरांवि
दूरायदक्षिणामूर्तयेनमः ॥ सूतउवाच कदाचिन्नारदोयोगीपरानुग्रहवांछ
या पर्यटन्सकलाल्लोकान्सत्यलोकमुपागमत् २॥ ॥

उपेक्ष्याचक्ष्महे तामेनांसंहितांमैमिषेरण्येनैमिषीयान्ऋषीन् श्रावयतिस्मसूतयत्याह अप्र
मेयेति अप्रमेयंत्रयंमायाजीवेश्वररूपंतदतीतंतस्मादधिकंयतोनिर्मलंयतज्ज्ञानं तत्स्वरूपाय
नमः मनोगिरांविदूरायवाङ्मनसागोचरायेत्यर्थः १ सूतउवाचेति कदाचिदिति योगीयोगप
क्वकषायतयाविदितवेदितव्यः ताटशास्यपर्यटनविफलंतत्राहपरेति परेषांतत्तल्लोकवासि
नांधर्मज्ञानाद्युपदेशेनयोनुग्रहस्तदिच्छयेत्यर्थः सत्यलोकंब्रह्मलोकं २ ॥ ॥ ॥ ॥

श्री
भ गा
वा टी
२

तत्र सत्यलोके मुनिपुंगवो नारद उत्तमानगुणं चतुर्मुखं विहृष्ट्वा बृष्ट्वावेति ग्रामिसत्तती येस्मो
कस्यनसंबुधः मूर्तिमद्भिः गृहीतविग्रहैः छंदोभिर्वेदैः परितोविष्टितं तत्रवेदार्थतत्त्वमेव
सम्यक्त्वेन नवेदमूर्तत्वस्यानादितिभावः बालार्कप्रभया बालार्को तत्स्वरूपप्रभया ३ स
वार्थगोचरज्ञानं अतीतानागतवर्तमानरूपायेसर्वेऽर्थास्तद्विषयज्ञानयुक्तं बहुव्रीहिसमा

तत्र दृष्ट्वा मूर्तिमद्भिश्छंदोभिः परिवेष्टितं बालार्कप्रभया सम्यक् भासयंतं स्व
भासुरं ३ मार्कंडेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः सर्वार्थगोचरज्ञानेन सर्व
त्रासमन्वितं ४ चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदं प्रणम्य दंडवद्भक्त्या
तुष्टाव मुनिपुंगवः ५ स तु हृष्टस्तं मुनिं प्राह स्वयंभूर्वै लवाहनम् किमच्छुकामम्
स्त्वमसितद्ददिष्यामितेमुने ६ इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवी
त्वतः श्रुतं मया सर्वं दृष्टं वैमे वस्तुभाशुभ ७ ॥

सः अतएव तत्तज्ज्ञानरूपयासमस्तलयाख्यां भाषातयायुक्तं ४ जगन्नाथं जगत्स्रष्टारं भक्ताभी
ष्टफलप्रदत्वेन प्रसन्नयोग्यतासूचनं ५ स्वयंभूरित्यनेन नानाहतज्ञानत्वं सूचितं वैस्वोनर
सर्वभूतेभ्यः पृथग्भूत्वा भवद्भावमात्मनः भूतानि भगवत्यात्मन्येष भागवतोत्तमः इत्युक्त
लक्षणं तत्पृष्टं वक्ष्यमाणर्थैः ६ शुभं विहितमशुभं निषिद्धं ७ ॥ २

एकमेव पुण्यहीनानां परलोकप्राप्त्युपाय इत्युक्तं तद्रहस्यमपि मत्स्यसंखं ब्रूहि अन्य इह परोपकारका
रणं पुण्येनापयुज्यतामित्येवं हृत्पाटयायद्धिमर्थी इत्यर्थः ८ दुराचाररताः निषिद्धकर्मनिरताः
तस्यैवमपंचः सत्यवार्तेति नास्तीतं वदेदिति निषिद्धान्नभाषणशीला इतियावत् ९ ९ सर्वेषा
पप्यमूलकारणमाह देहात्मदृष्टय इति देही एवात्मदृष्टिर्येषां ते इत्यर्थः एवं च देहनाशे सो
ऽस्य नाशात् पापपुण्यफलभोक्तुरभावात् याद्दष्टीनां विहिताकरणनिषिद्धकरणयोः प्रवृत्तिरिति
भावः स्थूलोऽहं गौरोऽहमिति प्रतीतिस्तु अज्ञातोऽजनत्प्रतीतिविरुद्ध इति तत्त्वं देहस्य परिणामित्वेन प्राति

॥ इदानीमेकमेवास्ति योतव्यं सरस्वतम् तद्रहस्यमपि ब्रूहि यदि तेऽनुग्रहो मयि प्राप्ते
कलियुगे घोरे नराः पुण्यविवर्जिताः दुराचाररताः सर्वे सत्यवार्तापराङ्मुखाः ९ प
रापवादनिरताः परद्रव्याभिलाषिणः परस्त्रीसक्तमनसः परहिंसापरायणाः १० ॥
देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिंकराः
विप्रा लोभग्रहग्रस्ता वेदविक्रयजीविनः धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः १२

तृणोपचयापचयाभ्यां शरीरस्य तदभिन्नस्यात्मनः विनाशित्वं तत्त्वमविनाशी वा देयमात्मेति स्मृतिसि
द्धं एतदज्ञानात् नास्तिका नास्ति परलोक इति बुद्धिमन्तः पशुबुद्धयः आहारविहारमात्रपरा विधिप्र
तिषेधानभिज्ञा इत्यर्थः स्त्रीदेवाः स्त्रीजिता इत्यर्थः तेषामत्र स्त्रियामेव स्मृतिः अन्ते कामकिं
कराः काम्यकर्ममात्रपराः ११ लोभग्रहग्रहणं भूतादिना ग्रस्ताः वेदविक्रयजीविनः भृतकाध्या
पनार्जनफलकतया अभ्यस्ता या विद्या तन्मदेनाहङ्कारेण विमोहिताः इतरावेतानशीलाः १२ ॥

श्री
प्र बा॰
बा टी॰
३

त्यक्तेति प्रत्रविप्राः इत्यनुवर्त्तते त्यक्तं स्वजातिकर्म ब्राह्मणानुचितं कर्माध्ययनादि यैस्ते ततः परवंचका
परवंचनार्थैव धर्मानुष्ठानवंतः क्षत्रियादयोप्येवमेवेत्याह क्षत्रिया इति स्वधर्मत्यागरूपं शी
लं येषां न तु कदाचिदपि धर्मशीला इत्यर्थः १३ ब्राह्मणाचारतत्परा इत्यनेन धर्मसंकरो दर्शि
तः स्त्रियश्चेत्यनेन वर्णसंकरो दर्शितः भर्तृवंचनेनिर्भयानिःशंकाः भर्तृवंचनाति पाठे वा द्विभा

त्यक्तस्वजातिकर्माणः प्रायशः परवंचकाः क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशी
लिनः १३ तथैव शूद्राश्च ये के चिद्ब्राह्मणाचारतत्पराः स्त्रियश्च प्रायशो भ्रष्टा भर्तृ
वंचननिर्भयाः १४ श्वशुरद्रोहकारिण्यो भविष्यन्ति न संशयः एतेषां नष्टबुद्धीनां
परलोकः कथं भवेत् १५ इति चिंताकुलं चित्तं जायते मम संततं लघूपायेन ये
नैषां परलोकगतिर्भवेत् १६ तमुपायं समाचक्ष्व हि सर्वं वेत्ति यतो भवान् इत्यु
क्ते वाक्यमाकर्ण्य प्रत्युवाचांबुजासनः १७ ॥

गुरिति त्यनेनावस्यादेरकारस्य लोपः १४ १५ परलोकगतिः भूर्लोकोर्ध्वं भुवर्लोकादिब्रह्म
लोकांतगमनं तच्च दुराचारादिजातदुःखनिहतिं विना चित्तशोधकसत्कर्मविना चेत् कः प्राप्य
मिति भावः १६ नत्वीदृशोपायज्ञाने मम कथं स्यादिति चेत्तत्राह सर्वं वेत्तीति यतो भवान् स ३
र्वज्ञ इति भावः अयमेतद्वदस्व वाक्यमाकर्ण्य अंबुजासनो ब्रह्मा प्रत्युवाचेति शेषोक्तिः १७ ॥

साधु सर्वजनहितं यतः पृष्टमतः साधु त्वं वक्ष्ये तदुत्तममिति शेषः तच्छृणु तदेवाह पुरेति त्रिपुरहं
तारं शिवं भक्तवत्सलेत्यनेन पार्वतीप्रश्नोपि स्वभक्तसकलजनकल्याणायैवेत्यर्थः इति सूचितं ८
पृष्टवती विनयान्विता तत्वं रामतत्वं व्याख्यातवान् कथितवानित्यर्थः ९ तत्किं तत्राह पुराणो-
त्तममिति पुराणमनादितश्चेतत उत्तमं श्रवणेन सर्वधर्मज्ञानकत्वाच्चित्तशुद्धिद्वारा तत्वज्ञानजनक-

साधु पृष्टं त्वया साध्वी वक्ष्ये तच्छृणु सादरं पुरा त्रिपुरहंतारं पार्वती भक्तवत्सला ८
श्रीरामतत्वजिज्ञासुः पप्रच्छ विनयान्विता प्रियायै गिरिशस्तस्यै पृष्टं व्याख्यातवान्
स्वयं ९ पुराणोत्तममध्यात्मरामायणमिति स्मृतं तत्पार्वती जगद्धात्री शुजयित्वा
दिवानिशं १० आलोचयंती स्वानंदमग्नाति ष्ठति सांप्रतं प्रचरिष्यति तल्लोके प्राणरह
श्रवणाद्यदा ११ ॥

पुराणमित्यर्थो ग्रंथनाम आत्मनेति ध्या-
ताचेति भावः अध्यात्मरामा
स्वाध्यात्मनिचिते तयासितया वर्तमानो यो रामो रमंते योगिनो ऽत्रेति व्युत्पत्त्या तयोगीनस्तस्याय
नं चित्तशुद्धिद्वारा प्रापकं तत्प्रतिपादकत्वादिति तत्र अध्यात्मरामायणं उत्तरश्लोकस्य आलो-
चनेऽदमेव कर्म १० स्वानंदमग्ना स्वस्वरूपानंदमग्ना तिष्ठति यत तु सांप्रतं युक्तं एतदालो-
चनेन स्वस्वरूपानंदस्य जनादंतयोगि रूपस्य स्मरमानादिति भावः ११ ॥ ॥ ॥

श्री अ॰ रा॰ बा॰ टी॰ ९

२२ संप्रवर्तते जनेष्विति शेषः २३ सर्वेषां पापग्रस्तत्वात्कलाविति भावः शास्त्राणि न्यायादीनि
विवदंते विवादं कुर्वंते आत्मविषये इत्यर्थः कर्ता भोक्ता ज्ञाता नाश्रय आत्मा एव स्वदेहभिन्न इति
काणादगौतमाः सांख्याः सर्वादियदार्थानापरस्परमात्मनि भेदज्ञानान्नानित्वित्यादि च ज्ञानस्वरू
पा अनेके जीवास्तेषां प्रकृत्यादिभ्यो भेदज्ञानान्मोक्ष इति सांख्यादयः एक एव चेतन उपाधिभि

तस्याध्ययनमात्रेण जना यास्यंति सद्गतिं तावद्विजृंभते पापं ब्रह्महत्यापुरःसरं २१
यावज्जगति नाध्यात्मरामायणमुदेष्यति तावत्कलिर्महोत्साहो निःशंकं संप्रवर्तते २२
यावज्जगति नाध्यात्मरामायणमुदेष्यति तावद्यमभटाः शूरास्संचरिष्यंति निर्भयाः
तावत्सर्वाणि शास्त्राणि विवदंते परस्परं यावज्जगति नाध्यात्मरामायणमुदेष्यति २३
तावत्स्वरूपं रामस्य दुर्बोधं महतामपि यावज्जगति नाध्यात्मरामायणमुदेष्यति २४

दानानात्वं प्रशस्तत्वमस्यादिवाक्यजश्रवणमनननिदिध्यासनैर्ब्रह्मैवाहमिति ज्ञानादुपाधि
विलये स्वस्वरूपेणावस्थानमेव मोक्ष इत्युपनिषत्सिद्धांत अध्यात्मरामायणोदये स्फुटो
भविष्यतीति ततश्चास्त्रवासनाजन्यो वादो लये मेष्यतीति भावः २५ रामस्य स्वरूपं सच्चि ९
दानंदाद्वयब्रह्मस्वरूपं महतामपि शास्त्रज्ञानामपि दुर्बोधं भवतीति शेषः २६ ॥ ॥

२७ २८ अध्यात्मरामायणातः सार्वविभक्तिकः पञ्चम्यंतात्तसिः २९ जीवन्मुक्त इति तल्लक्षणं च दुःखे-
ष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते इत्यादिना गीतायामु-
क्तं वासिष्ठेऽपि निद्रादौ जागरस्यांते यो भाव उपजायते तं भावं भावयन् राम जीवन्मुक्तः सदा

अध्यात्मरामायणसंकीर्तनश्रवणादिजं फलं वक्तुं न शक्नोमि कार्त्स्न्येन मुनिस-
त्तम २७ तथापि तस्य माहात्म्यं वक्ष्ये किंचित्तवानघ शृणु चित्तं समाधाय शिवेनोक्तं
पुरा मम २८ अध्यात्मरामायणतः श्लोकं श्लोकार्धमेव वा यः पठेद्भक्तिसंयुक्तः स पापा-
न्मुच्यते क्षणात् २९ यस्तु प्रत्यहमध्यात्मरामायणमनन्यधीः यथाशक्ति वदेद्भक्त्या
स जीवन्मुक्त उच्यते ३० यो भक्त्यार्चयतेऽध्यात्मरामायणमतंद्रितः दिने दिनेऽश्वमेधस्य
फलं तस्य भवेन्मुने ३१ यदृच्छयापि योऽध्यात्मरामायणमनादरात् अन्यतः शृणुया-
न्मर्त्यः सोऽपि मुच्येत पातकात् ३२ नमस्करोति योऽध्यात्मरामायणमह्रतः सर्वदेवार्च-
नफलं संप्राप्नोति न संशयः ३३ लिखित्वा पुस्तकेऽध्यात्मरामायणमशेषतः यो दद्या-
द्रामभक्तेभ्यस्तस्य पुण्यफलं शृणु ३४ अधीतेषु च वेदेषु शास्त्रेषु व्याकृतेषु च यत्फ-
लं तु लभेल्लोके तत्फलं तस्य संभवेत् ३५ एकादशीदिनेऽध्यात्मरामायणमुपोषितः ३

भवेति ३१ ३२ अनादरात् यदृच्छयापि तत्पुराणश्रवणविमुक्तनियमेनेत्यर्थः ३२ ३३
३४ अधीतेष्विति सांगवेदाध्ययने शास्त्राध्ययने च यत्पुण्यं उ लभेत् तत्फलं तस्याध्यात्मरामा-
यणपुस्तकदातुः संभवेदित्यर्थः ३५ ॥

श्री. अ. रा. टी. ५

३६ ३७ ज्ञानवितः कृतज्ञानावरणः ३८ आत्मतत्त्वधनं अतिप्रियं वित्तमित्यर्थः सर्वतोभद्रमेवंगले
प्सितं इति पाठः प्रकरणं सर्वतोभद्रमिति तत्पर्यायेणाभिधानात् ३९ आत्मतत्त्वस्य इति अनेन
देशपदेयवस्तुकालसंप्रधानविशेषणाणां गुणानां तिथायजनकं वित्तं ४० गायते इति पाठेन

यो रामभक्तः सदा तिव्याकरोति नरोत्तमः तस्य पुण्यफलं वक्ष्ये शृणुष्व द्विजसत्तम ४१
मन्त्रं वदेत्तु गायत्रीपुरश्चर्याफलं भवेत् उपवासव्रतं कृत्वा श्रीरामनवमीदिने ४२
रात्रौ जागरितो ध्यात्मरामायणमनन्यधीः यः पठेत्कृष्णपक्षादापि तस्य पुण्यं वदाम्यहं ४३
कुरुक्षेत्रादितीर्थेऽखिलपुण्यं तीर्थे सनेकशः आत्मतत्त्वधनं स्तुत्ये ग्रहणे सर्वतोभद्रेव ४४
विप्रेभ्यो व्यासतत्त्वम्भोद्दत्वा यत्फलमश्नुते तत्फलं संभवेत्तस्य सत्यं सत्येन सपायैः ४५
यो गायते सदाध्यात्मरामायणमहर्निशं आज्ञां तस्य प्रतीक्षन्ते देवा इन्द्रपुरोगमाः ४६
पठन्नध्यात्मरामायणमनन्यव्रतः यद्यत्करोति तत्कर्म ततः कोटिगुणं भवेत् ४७
तत्र श्रीरामहृदयं यः पठेत्सुसमाहितः ब्रह्महत्यापि ज्ञाताज्ञाता त्रिभिरेव दिनैर्भवेत् ४८
श्रीरामहृदयं यस्तु हनूमत्प्रतिमान्तिके त्रिःपठित्वा यदि मौनी सर्ववाञ्छितभाग्भवेत् ४९

स्वर्षः यो गायति सदेति पाठे त्वमुक्ताप्येव ४६ अनन्यव्रतः तत्सदः ततः सम्भाक्रियमाणकर्मणः
४७ तत्राध्यात्मरामायणमध्ये सुसमाहितः स्थिरचित्त ४८ प्रतिमान्तिके प्रतिमासमीपे ४९

पठत्स्तलस्यादिसंनिधौ रामहृद हृदयंपठन् प्रकुर्वीतप्रदक्षिणादीनितिशेषः सप्रत्यक्षरं प्र
यत्नेनोच्चारणाद्ब्रह्महत्यातज्जन्यंपापंनिवर्तयेत् आत्मनः श्रोतृभ्यश्चेतिशेषः ४५ अहंब्रह्मा ४६
यत्ररामगीतामाहात्म्य ४७ रामगीतापठ्यमानेतिशेषः कदाचन रविग्रहादिकालेऽपि

पठन् श्रीरामहृदयंतुलस्यश्वत्थयोर्यदि प्रत्यक्षरंप्रकुर्वीतब्रह्महत्यांनिवर्तयेत्
४५ श्रीरामगीतामाहात्म्यंकृत्स्नंजानातिशंकरः तदर्द्धंगिरिजावेत्तितदर्द्धंवेद्म्यहंमु
ने ४६ तन्मेकिंचित्प्रवक्ष्यामिकृत्स्नंवक्तुंनशक्यते यज्ज्ञात्वातत्क्षणाल्लोकश्चित्तशुद्धि-
मवाप्नुयात् ४७ श्रीरामगीतायत्पापंनाशयतिनारद तन्ननश्यतितीर्थादौलोके
क्वापिकदाचन ४८ तन्नंपश्याम्यहंलोकेमार्गमाणोऽपिसर्वदा ४८ रामेणोपनिष
त्सिंधुंमन्मथ्योत्पादितो मुदा लक्ष्मणायार्पितांगीतासुधांपीत्वामरोभवेत् ४९
जमदग्निसुतः पूर्वंकार्तवीर्यवधेच्छया धनुर्विद्यामभ्यसितंमहेशस्यांतिकेवा-
मत् ५० पठ्यमानोपावंत्या रामगीतांप्रयत्नतः ऋणवाहहीनाअपुपठन्नाराया-
णाकलामगात् ५१ ब्रह्महत्यादिपापानांनिष्कृतिंयादिवांछति रामगीतांमास-
मात्रंपठित्वामुच्यतेनरः ५२ ॥
स्नानादिनेतिशेषः ४८ मार्गमाणः अन्वेषयन्नपि तत्-
रामगीतातुल्यतयापापनाशकं वस्तु रामगीतातिरिक्तं नपश्यामीत्यर्थः ४९ गीतासुधा-
मितिरूपकं अमृतरूपांगीतामित्यर्थः अभ्यस्तवत्यः कार्तवीर्यः सहस्रबाहुरर्जु-
नः ५० स्ववर्णोत्तरंग्रहणांनारायणाकलांनारायणरूपत्वं ५१ ५२ ॥

श्री॰
अ॰ रा॰
वा॰ टी॰
६

दुःप्रतिग्रहइति दुःप्रतिग्रहस्तिलधेनुर्गजोवाजीस्त्रीरत्नाश्वतिलंमणिः मणिःशालग्रामस्तदा-
भिःस्तूयमानाचयोगःसम्प्रतिग्रहाहन्यादिरूपस्तस्मिन् दुर्भोजनेपि दुष्टभक्तगोडवालापोन्नभाष
णादि ५३ ५४ ५५ ५६ तत्तद्दानादिजनितंतत्फलंलभेत अनेनतत्फलदानादिफलभोगोतदध्यय

दुःप्रतिग्रहदुर्भोज्यदुरालापादिसंभवं पापंयत्कीर्तनेनरामगीताविनाशयेत्
शालग्रामशिलाग्रेचतुलस्याश्वत्थसंनिधौ यतीनांपुरतस्तद्वद्रामगीतांपठेत्तुयः ५४
सतत्फलमवाप्नोतियद्वाचोमिनगोचरे रामगीतांपठेन्नक्षत्रायः श्राद्धेभोजयेद्विजा
न् तस्यतेपितरःसर्वेयान्तिविष्णोःपरंपदं ५५ एकादश्यांनिराहारोनियतोद्वाद-
शीदिने स्थित्वागस्त्यतरोर्मूलेरामगीतांपठेत्तुयः सएवराघवःसाक्षात्सर्वदेवै
स्तुस्तूयते ५६ विनादानंविनाध्यानंविनातीर्थावगाहनं रामगीतांनरोधीत्यत
दनंतफलंलभेत ५७ बहुनाकिमिहोक्तेनश्रृणुनारदतत्त्वतः श्रुतिस्मृतिपुरा
णेतिहासागमशतानिच अर्हन्तिनाल्पामध्यात्मरामायणकलामपि ५८ ॥

तन्मात्रेणशुभवादित्यर्थः ५७ श्रुतिर्वेदःस्मृतिर्मन्वादिप्रणीता पुराणानिपाद्मादीन्यष्टाद
शइतिहासोभारतादिरागमाःपंचरात्रादयः अध्यात्मरामायणस्यतदध्ययनस्यक ६
लाषोडशांशमपिनार्हन्तितदध्ययनानीत्यर्थः सर्वाध्ययनफलदत्वादस्येतिभावः ५८

पुटतीत्यत्र उक्तमाहात्म्याध्यायकर्म ५९ इति श्रीमन्मकलराजविपक्षडरणसम
र्थेत्यादिविरुदावलीराजमानस्य हिम्मतिवर्माणः पुत्रस्य श्रीरामवर्मणः कृतौ अ

अध्यात्मरामचरितस्य मनीषिताय
महात्म्यमेतदुदितं कमलासनेन
यः श्रद्धया पठति शृणुयात्स मर्त्यः
प्राप्नोति विष्णुपदवीं सुरदुर्लभा
नः ५९ ॥ इति श्रीब्रह्माण्डपुराणे
उत्तरखण्डे एकषष्टितमोऽध्यायः १

ध्यात्मरामायणे सेतो बालकांडे तन्माहात्म्येऽध्यायः ॥१ ॥ रामायनमः ॥

श्री॰
अ॰ रा॰
टी॰
७

शिवपार्वतीसंवादरूपमध्यात्मरामायणं वक्तुं भगवान्व्यासो निर्विघ्नार्थं भगवत्स्मरणात्मकं
मंगलमाचरति य इति पृथ्व्यां यो दुष्टानां तत्सादिजनितो भरो भारस्तस्य वारणाय येत्यर्थः परित्राणा
य साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे इति भगवदुक्तेः दिवि
जैर्देवैः रावणपीडितैः संप्रार्थितः सन् चिन्मयोपि चिद्रूपोपि अव्ययोपि पृथ्वीतले रविकुले मा
यामनुष्यः संजातः तत्र देवप्रार्थनया यमवतार इत्यर्थः वाल्मीकेये बालकांडे पंचदशषोड
शर्गाःस्य च कणमव्ययत्वमनत्यभावस्य नाशाव ... भावादत्र उक्तं मायेति मायानाम सर्वासः

यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः पृथ्वीतले रविकुले माया
मनुष्योऽव्ययः निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां विधाय जग
तं जानकीशं भजे १॥

त्वाभ्यामत्र विशेषणाभ्यामस्य जन्मगुणाः घटितत्वन्नासामर्थ्यवती काचिदीश्वरशक्तिः देवा
त्मशक्तिं स्वगुणैर्निगूढामिति श्रुतेः दैवी ह्येषा गुणमयी मम माया दुरत्ययेति गीतोक्तेश्च एवं चा
चिन्मयस्याघटितोपि मनुष्यभावो जन्मव्यवहारश्च मायाकृत एव भावः तदुक्तं रामपूर्वतापनीये
पनिषदि चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः उपासकानां कार्यार्थं ब्रह्मणो रूप
कल्पनेति निश्चक्रं निर्विशेषं यथा तथा हतराक्षसः जगतां पापहरां स्थिरां कीर्तिं विधाय लो
के स्थापयित्वा पुनराद्यं ब्रह्मत्वं निरुपाधिब्रह्मस्वरूपमगात् १॥ ७

णमस्योक्तं ब्रह्मत्वं लक्षणं द्रढयति विश्वते विश्वस्य संसारस्योत्पत्तिलयादिषु एकं हेतुं यतो वा इमा
नि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः प्रयेति यत्र लीनानि भवंतीत्य
र्थः अनेन निमित्तकारणत्वसमानाधिकरण्यं जगदुपादानकारणत्वं ब्रह्मलक्षणं सूचितं एकमि
त्यस्य हायार्थकं तेन निमित्तकारणाभेदः सूचितः ननु मिथ्याभूतकार्यनिरूपितकारणत्वस्या
पि मिथ्यात्वाद्ब्रह्मणः संबंधाभावात्कथमस्य लक्षणत्वमत आह मायाश्रयमिति मायाश्रयत्वा
त्कल्पितमिदमस्य कारणत्वमित्यर्थः मायिकेन कारणत्वेन मायिक एव ब्रह्मणः संबंध इति भावः
तदुक्तं स्मृतौ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति ननु मायाश्रयत्वे जीवं प्रति स्वस्व

विश्वोद्भवस्थितिलयादिषु हेतुमेकं मायाश्रयं विगतमायमचिंत्यमूर्तिं आनंदसां
द्रममलं निजबोधरूपं सीतापतिं विदिततत्त्वमहं नमामि २॥

रूपमिव स्वस्यापि पुनं
मायया आवरणं स्यात् आह विगतमायमिति विगता माया आवरणशक्तिरूपा यस्मात्तेन श्रुति
स्वस्वरूपावरणशक्तिरहिता सत्यर्थः अचिंत्यमूर्तिं यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुतेः
एवं जगदुत्पत्त्यादिकारणत्वरूपं तटस्थलक्षणमुक्त्वा तेन रूपेणाज्ञेयत्वात् अथ स्वरूपलक्षण
माह आनंदसांद्रममलं निजबोधरूपमिति सत्यं ज्ञानमानन्दं ब्रह्मेति श्रुतेः इदमेव ज्ञेयं अ
मलं उपाधिकृतदोषरहितं जीवस्तूपाधिकृतकर्तृत्वाद्यभिमानवान् तथा नेश्वर इति भावः
नित्यस्वाभाविकं बोधरूपमेव यस्य तं अनेन रूपांतरं सर्वं मायिकमिति सूचितं विदिततत्त्वं ज्ञाता
तत्त्वस्वबोधस्वरूपत्वेन तं तेन रामावतारे शोकक्रोधादिनटनमात्रमिति सूचितं २॥

श्री॰ प्र॰ बा॰ टी॰ ८

हरिमेव हरिसायुज्यमेव ३ यः शृणोत्यात्मसहस्रशीर्षाणां गतन्नमाणिक्यादिसंख्यगोदानादधिकं फ
लं लभेदित्यन्वयः ४ पुरारिगिरिसंभूतामाणावृत्तिवद्रूपके अध्यात्मरामगंगेति अध्यात्मरामशब्देनाध्या
त्मरामायणापवस्तुदेवगंगेति अनेनरूपकेणसर्वमहापातकादीनामपिनाशइति सूचितं गंगाया
स्तन्नाशकत्वस्यसर्वत्रश्रुतिस्मृतिप्रसिद्धत्वात् ५ सकलमलहरत्वस्यविषयवाद्दाक्यस्यसकलमलहरत्वं
आनंदकंदमितीवृषणं एतस्यैवानंदस्यमात्रामुपजीवंतीतिश्रुतेस्तस्यसर्वानंदमूलत्वेनानंदकंदत्व
मुक्तं ये नित्यमनन्यचेतसः शृण्वंतिचाध्यात्मसंज्ञितं रामायणं सर्वपुराणसम्मतं
निर्धूतपापाहरिमेवयांतिते ३ अध्यात्मरामायणमेवनित्यं पठेद्यदीच्छेद्भवबंधमुक्तिः गवांस
हस्रायुतकोटिदानात्फलंलभेद्यः शृणुयात्सनित्यं ४ पुरारिगिरिसंभूताश्रीरामार्णवसंगता
अध्यात्मरामगंगेयं पुनातिभुवनत्रयं ५ कैलासाग्रेकदाचिद्रविशतविमलेमंदिरेरत्नपी
ठे संविष्टंध्याननिष्ठं त्रिनयनमभयं सेवितं सिद्धसंघैः देवीवामांकसंस्थागिरिवरतनया
पार्वतीभक्तिनम्राप्राहेदंदेवमीशं सकलहरं वाक्यमानंदकंदं ६ नमोस्तुते देवजगन्नि
वास सर्वात्मदृक्त्वं परमेश्वरोसि पृच्छामितत्त्वं पुरुषोत्तमस्य सनातनत्वं च सनातनाति ७
देवो योतनात् जगन्निवसत्यस्मिञ्जगतीतिनिवसतीतिवाजगन्निवासस्तत्संबुद्धिः तेतुभ्यंनमः अस्त
ु यतस्त्वंसर्वात्मदृक् सर्वस्वरूपश्चात्मासर्वात्मा ब्रह्मसर्वंखल्विदंब्रह्मेतिश्रुतेः तमनिशंमात्मस्व
रूपतयापश्यतीतिसर्वात्मदृक् अतएवपरमेश्वरोसि अतः पुरुषोत्तमस्य सर्वेभ्यः पुरुषेभ्यउत्तमा
मस्यतस्यैवब्रह्मणः सनातनेउपाधिरहितस्योपाधिरूपस्यतानोतत्वं नाशाभावेसनातनत्वं तत्वंपृच्छामि

अत्यंतं गोप्यं इदं तत्ते गुह्यतममिति विनीतोक्तेः अनन्यवाच्यं भक्तानामेष वक्तुं मयोग्यं अहो मद्विभ
क्तेषु वदति यतो मे दृष्टं यतत्त्वनिश्चयेयं वद हे देव यतो हं तव भक्ता. ननु मद्भक्तानां तु तत्त्वा
यतत्त्वं मे प्रियोसि ८ ज्ञानमिति येन ज्ञानेन जन्मान्तरति शुन जन्मादि संसारे न प्राप्नुवंति त
त्सविज्ञानं ज्ञानं ब्रूहि विज्ञानं निदिध्यासनपरिपाकजन्मापरोक्षज्ञानं तत्सहितं तत्फलकमि
ति यावत् ज्ञानं श्रवणमननजं परोक्षं ब्रह्मैव सन् ब्रह्मैवाप्नोतीति च तरति शोकमात्मविदिति
श्रुतेः तत्सहितज्ञानकवाक्यं ब्रूहीत्यर्थः तत्तज्ज्ञानं च न वैराग्यं किंतु वैराग्यं च न भक्तिं विनेत्यतस्या
गोप्यं यद् त्वंतमनन्यवाच्यं वदंति भक्तेषु महानुभावाः तदप्यहोहं तव देव भक्तास्मि यो
सि मे त्वं वद यत्तु पृष्टं ८ ज्ञानं सविज्ञानमथानुभक्तिवैराग्ययुक्तं च मितं विभास्वत् ज्ञा
नाम्यहं योषिदपि त्वदुक्तं यथा तथा ब्रूहि तरंति येन ९ पृच्छामि चान्यच्च परं रहस्यं तदेव
वचाम्य वदाविजानाद् श्रीरामचंद्रेऽखिललोकसारे भक्तिर्दृढा नौ भवतु प्रसीद १०
इ अनुभक्ति वैराग्ययुक्तं चेति भक्तेः पश्चादनु भक्तिजायमानं यद्वैराग्यं तद्युक्तं तद्वाग्या
वोधकवाक्ययुक्तं चेत्यर्थः तथाच पातंजले सूत्रं दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसं
ज्ञा वैराग्यमिति अत्र श्रवो वेदस्तद्बोधितः स्वर्गादिरानुश्रविकः भक्तिरीश्वरानुरागः तथा
मितं मितप्रायं भवत् विभास्वत् विशेषेणाभास्वत् श्रुतिमात्रेणाप्यदितीत्यर्थः प्रत्यायकशब्द
युतं बोधजनकवाक्यं यत्तद् ब्रूहि यथा योषिदप्यहं त्वदुक्तं जानामि ९ अग्रे प्रथमतः इ
(?)भक्तेः प्रसिद्धा नौ भवतु भवसागरोत्तारणायेति शेषः १० ॥ ॥ ॥ ॥ ॥

श्री॰ प्र॰ बो॰ टी॰ ९

तदेवाह भक्तिरिति ततोन्यत्तत्साधनं नास्ति अन्यद्दर्शोदितसाधनं मोक्षजनकतया ज्ञानयज्ञनाली
न्यर्थः ज्ञानक्षेत्रतयेदितत्वात् भक्तिः परानुरक्तिरीश्वरेति भक्तिमीमांसाकंकच्छादिल्यसूत्रात्र श्र
वेणात्तातेनसाधनतयावेदितत्वात्माभक्तिर्मुक्तिन्यायसूत्रार्थः भक्तिलक्षणपरेवद्वितीयसूत्रे प्र
त्यक्षावपतनंविहतसंशयविषयंरामसंस्थानीयपदं ८ निरस्तसमस्तमायागुणसंबंधादिहृतोवा
देवादिसंवादरूपेणेत्त अप्रमत्तोप्रमादोः ज्ञानेनतद्रहिताःप्रसादं वैष्णवमहं प्रवीमीतिसनत्सना

भक्तिः प्रसिद्धा भवमोक्षणाय नान्यत्ततः साधनमस्ति किंचित् तथापि हृत्संशयबंधनं मे
विभेत्तुमर्हस्यमलोक्तिभिस्त्वं ७ वदंति रामं परमेकमाद्यं निरस्तमायागुणसंप्रवाहं भजं
ति चाहर्निशमप्रमत्ताः परं पदं यांति तथैव सिद्धाः ८ वदंति केचित्परमोपि रामः स्वावि
द्यया संवृतमात्मसंज्ञं जानाति नात्मानमतः परेण संबोधितो वेद परात्मतत्त्वं ९ ॥

तीयोक्तः तत्रहि मुमुक्षुर्वै तमसर्वस्य इति श्रुतेर्भक्त्युपदेनात्तानमिति बोध्यं तथैव तेन प्रकारेण भजनेनैव
सिद्धास्तत्त्वज्ञाः संतः परंपदं मोक्षं यांति ८ परमोपि रामः स्वाविद्यया मायया वेद जानाति केचि
दूदंति तथा च वाल्मीकीये रावणवधानंतरं ब्रह्मवाक्यं तत्रवाच ततो देवः स्वयंभूर्भगवांस्तुष्टु
तिः महत्त्वत्वविश्वाऽऽजस्तात्वयमत्सर्वदेहिके भवान्नारायणः साक्षाद्देवश्चक्रायुधप्रभुरित्यादि उ
पदेशात्तहस्योभगवदेरप्युक्तं ब्रह्मदासादयेर्थं तदुक्तैवामानन्दमम तत्र विस्मृत्वं संबोधनयत्नात्

[illegible] ९

सीतानिमित्तो विलापस्तत्वारण्यककांडकिष्किंधादौ वाल्मीकीयस्पष्टएव केनसेव्यः अतस्मा
जीववत्तेनव्यवहाराभाव इत्यर्थः ४६ ४७ परात्मनो ब्रह्मणः ४८ एवं पार्वत्या पृष्टः शिवो रामस्वरूपमा
ह रामइति रामः परात्मा ब्रह्मैवेत्यर्थः प्रकृतेरित्यस्यान्यइति अग्रेसर्वाणीतिचयोषः प्रकृतिनिष्क
र्यैभान्यत्वात्तेरसंसर्गाच्चरामः परमेश्वरएवेत्यर्थः जीवस्तुतत्पेयाधिभिः संसृष्टत्वात् कर्तृत्वाद्य
भिमानवानितिभावः अतएवानादि विकप्रावेदाकार्यानंदव्याहृतये नादिरिति एवंचानंदरूपत्वे
यदि सजानातितर्हि कुतो विलापः सीताहृतेतेन कृतः परेण जानातिनैवं यदिकेनसेव्यः
समोहि सर्वैरपिजीवजातैः ४९ अत्रोत्तरं किं विदितं भवद्भिस्तद्ब्रूतमेसंशयभेदिवा
क्यं ५० श्रीमहादेवउवाच धन्यासिभक्तासिपरात्मनस्त्वं यज्ज्ञातुमिच्छा तवरामतत्वं
पुरानकेनाप्यभिचोदितोहं वक्तुं रहस्यं परमंनिगूढं ५१ त्वयाद्य भक्त्यापरिनोदितोस्मि
हे वक्ष्येनमस्कृत्य रघूत्तमंते रामः परात्मा प्रकृतेरनादिरानंद एकः पुरुषोत्तमोहि
५२ स्वमायया कृत्स्नमिदं हि सृष्ट्वा नभोवदंतर्बहिराश्रियः एकमेवाद्वितीयं ब्रह्मेति
श्रुतिसिद्धब्रह्मेत्य अतएवपुरुषोत्तमः पुरुषेभ्यो जीवेभ्य उत्तमः हि प्रसिद्धमेतदित्यर्थः ५२
नन्वीदृशस्यसमस्तव्याप्तदेहधारणे कथमतआह स्वमाययेति अघटितघटनापटीयसीशक्तिरूपामाया
मायांतप्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतिसिद्धा तया इदं कृत्स्नं दृश्यं सृष्ट्वा तं बहिराश्रितो
यः तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः तादृशः स मनश्चयादीवयतिग्रहोनाश्रयोयतउक्तं गीता
भाष्ये भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोपिसन् मायया देहवानिवजात इवच लोकानुग्रहं कु

श्री·
भ· गी·
बा· टी·
९

नवेदं सर्वगतत्वेन सर्ववेत्तेयः किं नेत्यत आह सर्वान्तरस्यापि निगूढ आत्मेति यः पृथिव्यां तिष्ठन् पृथि
व्या अन्तरः इत्यादिश्रुत्या सर्वान्तरस्य चेतनस्यापि निगूढः एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते इत्यप
ने च श्रुत्या याबुद्ध्यास्त्वग्र्यया सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतेः तादृशस्य सर्वव्यवहारस्य कालिकमपि ज्ञानमा
ह स्वमाययेति स्वाज्ञानकल्पितया माययेत्यर्थः अयं भावः नित्यशुद्धादिरूपस्य स्वस्वरूपाज्ञाने
न तस्यानुदितचाटनासामर्थ्यापरपर्याया माया चाविद्या त्रिगुणात्मिका रूपाधिकल्पिता वच्छेदे
लन्दरूपैर्जीवैः कल्पिता स्वा च स्वजातीयमेव संसारमस्थावचप्रकृते अत एव तत्तद्रूपज्ञाने
सकार्याया अस्यानाशः रज्जुज्ञानेनेव रज्जुकल्पितभुजगस्य भयकंपादिकार्यसहितस्य नच

सर्वान्तरस्यापि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे ८ ॥

जीवैस्तत्कल्पनात्तत्सृष्टोपाधिविशिष्टजीवत्वेनान्योन्याश्रयः अनादित्वेन परिहारात् तत्वैकस्य
तत्वज्ञानेन तन्नाशे संसारोच्छेदापत्तिः एकस्य जीवस्य युगपत् तदपासने सर्वमोक्षः एकस्य वज्ज्ञानेन तस्य
सर्वभ्रमेत त्कार्यभयकंपादेर्निवृत्तेः अन्येषां तद्दर्शनेन तदनिवृत्तेश्च बहुप्रपतेरिति तथा सृष्ट
मिदं विचष्टे पश्यति एवं च द्रष्टृत्वेन तत्सिद्धिः नान्योऽतोऽस्ति द्रष्टेति श्रुतेः एकेनैवाकाशेनोपाधि
भेदात् घटाकाशादिव्यवहारवत् एकेनैव चेतनेनोपाधिभेदादनेकजीवव्यवहारोपपत्तौ चे
तनानेकत्वे प्रमाणाभावात् द्रष्टृत्वेन तत्सिद्धिरिति भावः न च तत्तदज्ञानरूपोपाधिविशिष्टस्यैव
जीवत्वे जीवस्याज्ञानमित्यव्यवहारानापत्तिः भार्याविशिष्टे सेवदत्तरूपस्यापि रहस्य स्वभार्येति व

चेतनस्वीकारेमांतरमाह जगंतीजगदंतःकरणानि यत्संनिधौ नित्यं परितो भ्रमंति स्वस्वचे
ष्टासुवृत्तिः अन्यथा सर्वस्य जडत्वाच्चेतनाभावे जगदाद्यप्रसंगादिति भावः ननु निष्कलेनिष्क्रि
यस्यात्मनि संनिकृष्टेपि निष्क्रियत्वात्कथं तेनान्येषां व्यापारसंपादनं तत्राह चुंबकलोह
वद्धीति यथा निष्क्रियोपि चुंबकमणिर्लोहं शक्तिविशेषात्संनिधिमात्रेण चालयति तथा चे
तनोपि निष्क्रियोपि स्वमायाविचित्रशक्तिविशेषात्संनिधिमात्राद्व्यापारयतीत्यर्थः तदुक्तमाचार्यै
र्नायत्नविकारः सत्यस्यकांतवदेव यद्बुध्यादींश्चालयेत्प्रत्यक सोहमित्यवधारयेति एतन्न।

जगंति नित्यं परितो भ्रमंति यत्संनिधौ चुंबकलोहवद्धि एतन्न जानंति विमूढ
चित्ताः स्वाविद्यया संवृतमानसा ये ४ स्वात्मानमध्यात्मनि शुद्धबुद्धे स्वा।
रोपयंतीह निरस्तमाये संसारमेवानुसरंति ते वै पुत्रादिसक्ताः पुरुकर्मयुक्ताः ५

मायागुणास्पृष्टत्वादिरूपं तं मत्स्वरूपं ये जीवा न जानंति अत एवेह ते विमूढचेतसः
विमूढचेतस्त्वे हेतुः स्वाविद्यया संवृतमानसा इति सोपाधिभूतयाऽविद्यया विद्यावि
रोधिभावदार्ढ्यरूपया संवृतांतःकरणाः ४ अतस्ते जीवाः शुद्धबुद्धे शुद्धे स्वमायादोषा
नाक्रांते चैतन्यबुद्धतानत्वरूपे निरस्तमाये स्वात्मानवतानिरस्तामायायेन तादृशे मामेव ये
प्रपद्यंते मायामेतां तरंति ते इति गीतोक्तेः ईदृशे मे स्वात्मानं स्वतत्त्वमारोपयंति स्वयम
नात्मानममत्वमिति जानंतीत्यभिप्रायः तेषां दुष्टफलमाह संसारमिति ते पुत्रादिसक्ताः
पुरुकर्मयुक्ताः भूरियत्नादिकर्मयुक्ताः संसारमेवानुसरंति ५ ॥

श्री॰
अ॰ गी॰
बा॰ टी॰
११ कौ

यतत्त्वेयथाऽज्ञाः कंठगतं चामीकरं स्वर्णालंकारं यथा न जानंति एवं हृदयेस्थितं रामं ते ज्ञानंति
अतः सुसमीपमेव न जानंतीत्यर्थः किंच परमात्मनो ज्ञानासंभव इति दृष्टांतेनाह यथेति अप्रका
शात्मको यथा रवि ज्योतिः स्वरूपेण विद्यते तथा विशुद्धविज्ञानेन निर्विशेषस्वरूपो ज्ञानेन ना
शनेनि विद्येय ततः परात्मनि उक्तदृष्टव्याप्युष्ट रामो अविद्याकर्तृ स्यात् न अदर्शनोव ज्ञान्य विद्यान
वत्वादितिभावः तदुक्तमाचार्यैः अप्रकाशो यथादित्ये नास्ति ज्योतिः स्वभावतः नित्यबो
धस्वरूपत्वान्नाज्ञानं तद्वदात्मनीति २१ ननु ज्ञानेनैव रामं मत्वा व्यवहरति जन इत्युक्तमस

ज्ञानं त्विनैवं हृदयस्थितं वै चामीकरं कंठगतं यथाऽज्ञाः यथाप्रकाशो न तु विद्य
ते रवौ ज्योतिःस्वभावे परमेश्वरे तथा विशुद्धविज्ञानघने रघूत्तमे विद्याकथं स्या
त्परतः परात्मनि २१ यथा हि चाक्ष्णा भ्रमता गृहादिकं विनष्टदृष्टेर्भ्रमतीव दृश्य
ते तथैव देहेंद्रियकर्तुरात्मनः कृतं परेऽध्यस्य जनो विमुह्यति २२ ॥ ॥ ॥

ज्ञातं अन्यथा तस्यान्यत्रारोपासंभवादित्याशंक्य सदृष्टांतं यथा सोऽहं जीवे उपपादयति
यथा विनष्टदृष्टेर्दोषयुक्तदृष्टेः पुरुषस्य भ्रमता चाक्ष्णा गृहादिकं भ्रमते वा दृश्यते भ्रमतीव तिष्ठत्य
तैव न दृष्टदृष्टेर्दोषात् पुरुषगतस्तद्दोषः तथैव देहेंद्रियावच्छिन्नस्य कर्तुरात्मनोंतःकरणस्या
हंकारात्मकस्य कृतं परे सर्वधर्मालिप्ते तदवच्छिन्नचैतन्ये अध्यस्य जनो जीवो मुह्यति अहं क
र्तेति मोहं प्राप्नोति एवं चक्षुष्या दिगतभ्रमणगृहादावारोपः यथा चांतःकरणधर्मस्य क
र्तृत्वादेरात्मन्यारोपस्तथा स्वाज्ञानस्य रामे चारोप इत्याशयः २२ ॥ ॥ ११

भगवति रामे सतोः ज्ञानमसंभवतीति पुनरपि दार्ढ्यायोक्तं प्रकृतोवाह नाहइति सूर्ये प्रतिरावि
दिवसविभासाभावे हेतुः प्रकाशरूपाद्व्यभिचारात्ः कचित्क्वापीत्यर्थः ज्ञानाज्ञाने यो भगवान्नात्मना
वस्थिते हेतुः शुद्धचितनत्व २२ उपसंहरति तस्मादिति परानंदमये सर्वभूते वेतदानंदमार्ग
याउपजीवनात विज्ञानरूपे निर्विकल्पज्ञानरूपे तमोः ज्ञानरूपं तमो संवेधे हेतु द्वयमज्ञानसं
ति त्वं मायाधिष्ठातृरूपं माया आश्रयत्वं च कोटक तमः मोहकारणं तमोः ज्ञानं योयत्मायाधिष्ठाता
सतह्धि छायाज्ञानहीन इति लोके दर्शनादिति भावः नन्वेवमपि ब्रह्मादासारवयेथे हृडत्येवपा
नाहोनराविः सवितर्यंशाभवेत्प्रकाशरूपाव्यभिचारतः कचित् ज्ञानेनतथाज्ञा
नमिदं द्वयं हरौ रामे कथं स्यात्स्यातिशुद्धचि-ने २२ तस्मात्परानंदमये रहो
त्तमे विज्ञानरूपे हि न विद्यते तमः अज्ञानमाति परविदलोचने माया आश्रयत्वे
त्वं हि मोहकारणं २४ अत्रैतकथयिष्यामि रहस्यमपि ड्लेभं सीतारामममहात्म्य
नसंवादसाधनं २५ पुरारामायणो रक्षो रावणो देवकंटके हत्वा रणे रणश्लाघी स
नदतमहत्याधाचार्ययुक्तैः कारातितितिचेत् श्रुणरावणवधार्थे मनुष्यत्वनाट्ना यभगव
ताम्रकल्पदेहे कृत स्वमाहात्म्याच्छादनस्य तत्र तमः प्राबन्धात्स्यदोषात उक्तं हि मेऽल्पप्रा
णीरके संकल्पदेवकमथु द्युनंदन स्वनाहं विज्ञान इति इति के चतकालेमतत्र ब्रह्मोपदेशा
मपलभ्यति मिति मात्रतत्त्वात्मसज्जे सह कृते सति देवकार्य इति भगवतेश्युक्तं स्वीकृतीनां गति
तितिष्याचकारेति २४ महत्मनतं वांयुपुत्रो हनुमान २५ रामायणे रामायण प्रवर्तकेरा

श्री॰ म॰ रा॰ बा॰ टी॰ १२

२२ परिवृतः सीतादिभिरिति शेषः २८ पुरतः स्थितं अग्रेस्थितं अनेन शुश्रूषासदनं दर्शितं निरा
कांक्षं ज्ञानेन तद्धनादिनिरपेक्षं २९ तत्त्वमसत्स्वरूपतत्त्वं निःकल्मषायमित्यनेन ज्ञानाधिकारित्वं
सूचितं तेनोक्तावयो ३० रामस्य तत्त्वं श्रोतुमिच्छितं यथा भवति तथा प्राह लोकविमोहिनीत्यने
न बंधनकर्तृत्वेन बंधविमोक्षे सामर्थ्यमिति दर्शितं राजाज्ञया बद्धोऽपि तदाज्ञयैव मुच्यत इति
लोके प्रसिद्धं एवं च भगवती कृपैव मुख्यमोक्षकारणमिति दर्शितं ३१ जानकीमाहेत्युक्तं त
दाह राममिति रामपरं ब्रह्म विद्धि रमन्ते योगिनोऽनन्ते नित्यानंदे चिदात्मनि इति निरामयपदेन

[illegible]

सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः अयोध्यामवाप्य महात्मा हनुमत्प्रमुखैर्वृतः २७
अभिषिक्तः परिवृतो वसिष्ठाद्यैर्महात्मभिः सिंहासने समासीनः कोटिसूर्यसमप्रभः २८
दृष्ट्वा तदा हनूमंतं प्रांजलिं पुरतः स्थितं कृतकार्यं निराकांक्षं ज्ञानापेक्षं महामति २९
रामः सीतामुवाचेदं ब्रूहि तत्त्वं हनूमते निःकल्मषोऽयं ज्ञानस्य पात्रं नौ नित्यभक्तिमान् ३०
तथेति जानकी प्राह तत्त्वं रामस्य निश्चितं हनूमते प्रपन्नाय सीता लोकविमोहिनी ३१

[illegible]

दं परं ब्रह्माभिधीयते इति तापनीये प्रथमे चोक्तेः सत्त्वबाधहीनं सत्यत्वं बाधबाहित्यं जगदाधे
कस्माद्धि गुणः बाधः किं मातृकोऽपि हि न वस्मातिक इष्यते इत्युक्तेः चित् ज्ञानस्वरूपं आनंदं तद्रू
पं अद्वयं परोक्षमेवाद्वितीयमिति श्रुतेः सर्वोपाधिविनिर्मुक्तं स्थूलसूक्ष्मसकलोपाधिरिति
शेषः विराड्हिरण्यगर्भस्वकारणानि चेत्युपाधयः ईश्वरस्य त्रिभिस्तानेनवीयं तत्त्वद्विड्ढेति
वार्तिके किं च सर्वोपाधिभिर्यैर्विनिर्मुक्तं सत्स्पष्टमित्यर्थः सत्तामात्रं चिदात्मानं सदिति व्यवहा

रविपात्सकलिभपर्याः पवनकंडगदेवसर्वरमति ३६ ॥

१२

निष्प्रवृत्त इति भावः अगोचरं मनोवचसोरविषयमित्यर्थः यतो वाचो निवर्तन्ते अप्राप्य म
नसा सह इति श्रुतेः ११ आनंदं तत्त्वेन विपुल नन्द्यप लभ्यते यो वै भूमा तत्सुखं नाल्पे सुख
मस्तीति श्रुतेः निर्मलं रजोहीनं शांतं प्रपंचोपशमत्वात् प्रपंचोपशमं शिवं शांतमिति श्रु
तेः निर्विकारं जायतेऽस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकारहीनं नश्य
ते म्रियते वेति गीतोक्तेः अनेनापरिणामित्वं सूचितं निरंजनं अविद्यातत्कार्यरूपतमो
हीनं आदित्यवर्णं तमसः परस्तादिति श्रुतेः सर्वव्यापिनं सर्वव्यापित्वादिवात्मानं अततीत्या

आनंदं निर्मलं शांतं निर्विकारं निरंजनं स।
र्वव्यापिनमात्मानं स्वप्रकाशमकल्मषं ११

प्नोतीत्यात्मा सर्वव्यापी सर्वभूतांतरात्मेति श्रुतिः स्वप्रकाशं अत्रायं पुरुषः स्वयंज्योतिरि
ति यस्य भासा सर्वमिदं विभातीति श्रुते सदादिशब्दानां कल्पितप्रवृत्तिनिमित्तभेदादपर्या
ते न सहप्रयोगः यानि स्वभावसत्त्वेन बोधकानि तेषु न कामन्वयपत्तिः एवं चापाततः का
ल्पितप्रवृत्तिनिमित्तप्रकारकबोधे वृत्ते शुद्धचितस्यचैतो सर्वधर्मरहितत्वेन अस्मात्कार्य
मीपाकल्पितग्रहेः शुद्धत्तिर्धर्मकब्रह्मबोधः सर्वैः पदैर्भवतीति बोध्यं तत्र शुद्धबोधस्यात्मत
त्त्वस्य बोधार्थं पुनः पुनः शब्दानामर्थं तच्चपरमकरुणावती भगवती सीता हनुमंतं बोधयति।

श्री॰
भ॰ गी॰
बा॰ टी॰
४३

नन्वेवं विधो वास्य जगत्कारणत्वाय संभवत्यस्मिन्निति कुतो जगदुत्पत्त्यादीत्यत आह मामिति मूल
प्रकृतिं सर्वजगदुपादानकारणमित्यर्थः प्रकृतिशब्दस्योपादानकारणे प्रसिद्धेः तदुपादानकार
णानां महदादीनामप्युपादानकारणत्वान्मूलप्रकृतित्वमस्याः मायां तु प्रकृतिं विद्यादिति श्रुति
प्रसिद्धं ब्रह्मणः पृथक्त्वेनाभेदाभेदाभ्यां सत्त्वासत्त्वाभ्यां चानिर्वचनीयामनादिमेवम्भूतां मायां पेरीश्वरस्य चा
प्रसिद्धं ब्रह्मणः पृथक्त्वेन तदभेदाभेदाभ्यां सत्त्वासत्त्वाभ्यां चानिर्वचनीयामनादि मे मायां
स्याईश्वरस्वरूपज्ञानेन तत्प्रबोधेनेति बोध्यं एषा च जीवाश्रितेश्वरसंनिधानात्तद्रूपेण निवर्तते इति वे
धं मूलप्रकृतिमेव सूदयति सर्गस्थित्यंतकारिणीमिति उत्पत्तिस्थितिप्रलयकर्त्रीं नन्वेवं तर्हि तत्त
वकुरस्याः प्रजायेयेति श्रुतेर्यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ती

मां विद्धि मूलप्रकृतिं सर्गस्थित्यंतकारिणीं तस्य सन्निधिमात्रेण सृजामीदमतंद्रिता ४४

ति ब्रह्मप्रकरणस्य श्रुतेश्च ब्रह्मणो जगत्कारणत्वं लभ्यते न हि कथमेतत्तत्राह तस्य संनिधीति
यथेन्द्रजालिकमायायास्तेनस्तन्मंत्रेण निष्पाद्या इंद्रजालिकं विना न स्वकार्यसामर्थ्यं तस्याः प्राते तन्नवि
धानेन जगत्कर्तृत्वमिति तत्र तदुपचारः यथा च हि गीवैशिष्ट्येनैव सिद्धस्वरूपस्य पुरुषस्य स
संबंधतत्संकल्पवशावर्तिनी रचनाति तथा मायावैशिष्ट्येनैव सिद्धस्येश्वरस्य सत्तागमं तत्संक
ल्पवशावर्तित्वमित्याह अतंद्रितातत्संकल्पितार्थे निरालस्येत्यर्थः तदुक्तं वाल्मीकीये रामं प्रति क
लववनेनसंतिष्ठ हर्ष लोकानेकत्वं मायया सह भार्यया अभयादेवाभांतेस्वंबन्जीजगन्नति

एवंभूतमत्कारणत्वं प्रतिपादितम् ॥ ४४ ॥ ४३

यद्यपि मायाशबलेश्वरे एव जगदुपादानत्वं निमित्तत्वं च जगतस्तदुपादानं मायामा
दायन्नामसौ निमित्तं शुद्धसत्त्वात्मकमुच्यते ब्रह्मतत्त्वं द्वैरेति अभिप्रायो नेतस्यापि विशिष्टस्य
विशेषणविशेष्योभयानतिरेकेण मायायोगात् स्वभावत्वारोपेणैव तत्तयाख्यवहार इत्या

तस्मात्त्रिधात्मया सृष्टं तस्मिन्नारो
पितैर्बुधैः अयोध्यानगरे जन्म रघु
वंशोत्तिडमेते ३५ विश्वामित्रसहायत्वं
मखसंरक्षणं ततः अहल्यापापशमनं
चापभङ्गो महेषितः ३६ सत्याणिग्रह
णं पश्चाद्भार्गवस्य मदहतयः अयोध्या
नगरेवासो मया द्वादशवार्षिकं
॥ ३७ ॥

ह तदिति यतस्तस्मात्त्रिधात्मया सृष्टमत तस्मिन् तत्स्रष्टृत्वादि अबुधैस्तत्स्वरूपानभिज्ञै
स्तत्रारोप्यते रजोसत्त्वेव इति भावः एतदेव दर्शयितुं कानिचित्स्वकृतानि तत्रारोप्या
णि दर्शयति अयोध्येत्यादि ३६ ॥ ३७ ॥ ॥

श्री॰ अ॰ रा॰ बा॰ टी॰ १४

मायामारीचमरणं मायया गृहीतमृगरूपमारीचमरणमित्यर्थः मायासीताहृतिरिति तदुक्तं
कूर्मपुराणोक्तं नवविंशे चतुर्विंशोऽध्याये रामस्य सुभगां भार्यां रावणो राक्षसेश्वरः सीतां विशालन
यनां चकमे कालनोदितः गृहीत्वा मायया वेषं चरन्तीं विजने वने समाहर्तुं मनश्चक्रे तापसः कि
लकामिनीं विज्ञाय सा च तद्भावं स्मृत्वा दाशरथिं पतिं जगाम शरणं वह्निमावसथ्यं शुचि
स्मिता उपतस्थे पावकं देवं साक्षिणं विश्वतोमुखं आत्मानं दीप्तवपुषं सर्वभूतहृदि स्थितं

दंडकारण्यगमनं विराधवधमेव च मायामारीचमरणं मायासीताहृतिस्तथा ३८
जटायुषो मोक्षलाभः कबंधस्य तथैव च शबर्याः पूजनं पश्चात् सुग्रीवेण समागमः ३९
वालिनश्च वधः पश्चात् सीतान्वेषणमेव च सेतुबंधश्च जलधौ लंकायाश्च निरोधनं ४०
रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः विभीषणे राज्यदानं पुष्पकेण मया सह ४१

मित्याद्युक्तश्लोकान्तर्गत इति वह्न्यष्टकं जप्त्वा रामपत्नी यशस्विनी ध्यायन्ती मनसा तस्थौ राम
मुन्मीलितेक्षणा अथावसथ्याद्भगवान् हव्यवाहो महेश्वरः आविरासीत् सुदीप्तात्मा तेज
सा निर्दहन्निव सृष्ट्वा मायामयीं सीतां स रावणवधेच्छया सीतामादाय रामेष्टां पावकोऽन्त
रधीयत कृत्वा तु रावणवधं रामो लक्ष्मणसंयुतः समादायाभवत्सीतां शंकाकुलितमा १४
नसः सा प्रत्ययाय भूतानां सीता मायामयी पुनः ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

विवेशापावकंदीप्तंदहज्वलनोपितं दग्धामायामयीसीतांभगवानुद्दीपितिः रामा
यादर्शयत्सीतांपावकोसौसुरप्रियः एतत्पतिव्रतानांवैमाहात्म्यंकथितंमया स्त्रीणांसर्वा
घशमनंप्रायश्चित्तंपरंस्मृतमिति अनेनस्त्रीणामेवंविधापदिअग्निप्रवेशोनदोषाय विप
रीतंवपापहरश्चेतिसूचितंवाल्मीकीयेपिमारीचवधोत्तरंतेरामेणरामहृतेनतेनरामशाहूत
दृशशब्देनाक्रोशकृतेलक्ष्मणस्यरामसमीपार्थंगमनप्रेरणावसरेआरण्यकांडेअपिमामह
रामेणापश्यंपुनरागतः लक्ष्मणेनैवमुक्तातुवैदेहीजनकात्मजा प्रत्युवाचततोवा
क्यंतीव्रंबाष्पपरिप्लुता गोदावरींप्रवेक्ष्यामिहीनारामेणलक्ष्मण आबंधिष्येथवात्यक्ष्ये
विषमेदेहमात्मनः विषमेभुक्त्वादोक्षियामिततः प्रयातेनेत्यर्थः पिवामिवाविषंतीक्ष्णं
प्रवेक्ष्यामिहुताशनं नत्वाहंराघवादन्यंकदापिपुरुषंस्पृशे इतिसीतोक्त्याहृवितोयमर्थः
अन्यथैवंप्रतिज्ञायरावणशरीरस्पर्शोजन्मान्तः प्रतिज्ञाहानिःस्यात् तस्मात्प्रवेक्ष्यामिहु
ताशनमित्यनेनस्वकर्तव्यार्थंरावोक्त इतिमंतव्यं एतत्प्रवेशादेवहनुमत्पुच्छ
संबद्धाग्निनालंकादाहोपपत्तिः अन्यथारावणवशीकृतेनलोकपाला
ग्निनाकथंतन्नगरदाहःस्यात् एतच्छुक्तिप्रवे
शात्तस्यस्वातंत्र्यहान्याप
पत्तिरित्यलं ३८
श्री यं या

श्री॰
अ॰ रा॰
बा॰ टी॰
१५

एवमादीनि कर्माणि अभिषेकदानादीन्यात्मनि निर्विकारे जन्मादिरहिते आरोपयंति एवं जग
त्कर्तृत्वादिकमपि मय्यपि सत्स्वेव रामे आरोपयंतीत्यर्थः ४२ निर्विकारत्वमेव रामे स्थापयत्यद्यु
ति राम इति निष्कलं निष्क्रियं शांतमित्यादिश्रुतेः आनंदमूर्तिरानंदस्वरूपः अचलः कूटस्थो
ऽतएवपरिणामहीनः मायागुणान् मायया सृष्टपदार्थाननुगतः तदधिष्ठानत्वेन स्थि
तस्तथा विभाति हि हिरूपा भाति यथा रज्जुवञ्छदेन सर्पाकारेण करणे परिणाम इति

अयोध्यागमनं पश्चाद्राज्ये रामाभिषेचनं एवमादीनि कर्माणि मय्येवाचरिता
न्यपि आरोपयंति रामेस्मिन्निर्विकारेऽखिलात्मनि ४२ रामो न गच्छति न तिष्ठ
ति नानुशोचत्याकांक्षते त्यजति नो न करोति किंचित् आनंदमूर्तिरचलः परिणा
महीनो मायागुणाननुगतो हि तथा विभाति ४३ महादेव उवाच ततो रामः स्वयं
प्राह हनूमंतमुपस्थितं शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनां ४४ ॥१॥

रज्जुः सर्पात्मना भाति यत्तदेव विवर्तोपादानत्वमित्याहुः सच सर्पाकारेण करणे परिणा
मः सत्त्वासत्त्वाभ्यामनिर्वचनीयस्तद्वदत्र एवं प्रपंचोप्यनिर्वचनीय इति दिक् ४३ उप
स्थितं आत्मनो द्वितीयत्वेन जीवेश्वरादिव्याख्यास्या कथमिति जिज्ञासया पृष्टे आत्मा ईश्व १५
रोऽनात्मा विदाभासो जीवः परात्मा शुद्धचैतन्यं ४४ ॥ ॥ ॥ ॥ ॥ ॥

तेषां तत्त्वमेव सद्दृष्टांतमाह आकाशस्येति एकस्याकाशस्य त्रिविधो भेदः महाकाशो जलाश
यावच्छिन्नाकाशः प्रतिबिंबाकाशश्चेति भेदात् तदेवाह महानिति महाकाश इत्यर्थः स एव
व महाकाशो जलाशये तदवच्छिन्न एव भवति तत्रैव जलाशये परं प्रतिबिंबाख्यं दृश्यते
एवं तस्य त्रिविधत्वमित्यर्थः ४५ एवं दृष्टांतमुपपाद्य दार्ष्टांतिकमाह बुद्धीति सर्वबुद्धीना
दितया बुद्ध्युपहितं चैतन्यं हार्दोपाधिमंडलस्य विभुत्वादिभिः सकलबुद्धिसमष्टिरेव मा

आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान् जलाशये महा
काशस्तदवच्छिन्न एव हि प्रतिबिंबाख्यमपरं दृश्यते त्रिविधं
नभः ४५ बुद्ध्यवच्छिन्नचैतन्यमेकं हार्दामथापरं आभास
स्त्वपरं बिंबभूतमेवं त्रिधा चितिः ४६ ॥ ॥ ॥

येति तदवच्छिन्नं चैतन्यमीश्वर इत्यर्थः अथापरं आभासः स तु बुद्धिप्रतिबिंबभूतो जीव इत्य
र्थः अपरं बिंबभूतमेवं चितिरिति येत्यर्थः आभासत्वपरं बिंबभूतमिति यादे बुद्ध्यवच्छिन्नं चै
तन्यमेकमित्येतेनेश्वरः हार्दामथापरमित्यनेन शुद्ध आभासत्वपरमिति जीवः जीवत्व
मेव स्फुरयति बिंबभूतमिति विश्वाहेन तायदवस्थाभिमानी विशति देहेंद्रियादिष्विति श्रु
त्यंतेः एतत्प्रतिबिंबाकाशस्थानीयमिति त्रिचितिरित्यर्थे इत्याहुः तत्र द्वौ मिथ्याभूतौ उपाध्या

सिद्धांत ३६

श्री॰
त्र ग॰
वा टी॰
१८

नन्वेवं शुद्धचैतन्यस्य साक्षीतिव्यवहारानुपपत्तिः साक्षाद्द्रष्टरि साक्षी न च शुद्धचैतन्ये द्रष्टृत्व मित्यत आह साभासेति आभासेन चैतन्यप्रतिबिंबेन सहिताया बुद्धेरंतःकरणस्येत्यर्थः तेन कर्तृत्वं सबुद्धेः साक्षिणि आरोप्यते तेनायं साक्षीतिपदवाच्य इत्यर्थः अयमाशयः जानातीत्य त्रावतः करणवृत्तिविशेषरूपा क्रिया ज्ञाधात्ववाच्या आभासविशिष्टस्येति तिङर्थ आश्रयः यदा स्वाध्यासेनाभासबुद्धौ विवेकाग्रहात् तदुक्तमाचार्यैः आत्माभासस्तु तिङ्वाच्यो धा

साभासबुद्धेः कर्तृत्वमविच्छिन्ने विकारिणि। साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथा
ऽबुधैः ४७ ॥

त्वर्थश्च धियः क्रिया उभयं चाविवेकेन जानातीत्युच्यते मृषा बुद्धेः कर्तृत्वमध्यस्य जानाती त्युच्यते तथा चैतन्यमाध्यस्य तत्र बुद्धिरिहोच्यते इति आत्माभास इति बहुव्रीहिः धियो ऽन्तःकरणस्य तदेवाह उभयं चेति मृषा चेति आभासबुद्धिगतक्रियाणां मिथ्यात्वात् अयं व्यवहारोऽपि मिथ्येत्यर्थः एवं च साभासबुद्धिगतद्रष्टृत्वस्याविच्छिन्नेऽपरिच्छिन्नेऽविकारि णि साक्षिणि बुद्धितादात्म्यापन्नाभासतादात्म्याध्यासेनारोपः तथा जीवो नित्यः स त्य इत्यादिव्यवहारात् जीवत्वमपि तत्रारोप्यत इत्यर्थः ४७ ॥ ॥ ॥ ॥ ॥ १९

आभासमादायततत्तथाव्यवहारसंभव इत्याह आभास इति तस्या मृषाभासनविद्याका
र्यत्वात्तुतथाव्यवहारस्य तमादायनोपपत्तिरित्यर्थः नद्वैताग्मस्वमतिमिथ्यैवात्रद्वैता
र्तत्वमभादित्येवं सर्वसिद्धबाधानुभवात् अतएवासावविद्याकार्यो जीवाख्य मोक्षमादष्टोस्य
त्वव्याध्यासिकं तत्त्वं वास्तवमिति बोध्यं आभासासत्यत्वं चाकदेप्रपंचितं वित्तरभयाद्वेहोच्य
ते ननु तन्तेचैविध्यंकिंचितवास्तवंनेत्याह अविच्छिन्नं विच्छेदोभेदस्तद्रहितं नन्वेवं त्रिधा
चितिरित्यसंगतं तत्राह विच्छेद इति भेद इत्यर्थः विकल्पितः उपाध्यध्यासकृत इत्यर्थः

आभासस्तु मृषाबुद्धिरविद्याकार्यमुच्यते अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विक
ल्पितः ४८ अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते तत्त्वमस्यादिवाक्यैश्च साभा
सस्याहमस्तथा ४९ ॥

एवं जीवानां त्रयस्याभेदोप्यध्यासकृत एवेति बोध्यं ४८ कल्पितभेदस्यैव प्रमाणाम
ह अविच्छिन्नस्येति अवच्छेदो भेदस्तद्रहितः आध्यासिकभेदवतः साभासस्याहमस्तत्त्वमस्या
दिवाक्यैः पूर्णेन ब्रह्मणा एकत्वं प्रतिपाद्यते तत्तथात्वं सति कल्पितभेदे सति उपपद्यते
इतिभावः सर्वथा भेदाभावे तथ्यानर्थक्यं वास्तवेपि भेदे तदानर्थक्यं वास्तवस्यावचनशाते
नाप्यनिवृत्तेरिति भावः अत्राविच्छिन्नस्य साहमह इत्यनेन त्वंपदार्थो दर्शितः पूर्णेनेत्यनेन तत्पदा

॥ २४ टीका

वे

श्री
प. दं.
टी.
८

एतदेव प्रश्नयन्न तदुपदेशफलमाह ऐक्येति आत्मनोर्जीवेश्वरयोः ऐक्यज्ञानं अहं ब्रह्मास्मीति ज्ञानं य
देति कर्मानुष्ठानात् पापक्षये सत्यन्तःकषायकर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इति स्मृतेः यद्यभावः
जीवेश्वरयोरुपाधिभिन्नयोरैक्यं श्रुत्योच्यमानं बाधितं सत् तत्त्वंपदयोरुपाधिरहितेन लक्षण
याविंवभूतस्य शुद्धब्रह्मैक्यपरतया पर्यवस्यतीति बोध्यं एतच्चाकरे विस्तरेण प्रपंचितं महावाक्य
ज्ञानफलमाह तदेति तादृशज्ञाने सति निर्धर्मकब्रह्मेन चिन्मात्रतया तत्स्वरूपज्ञानात्तत्स्वरू
पज्ञानरूपाः अविद्या स्वकार्यैः प्रपंचैः सह नश्यत्येव न संशयः एतेन भ्रष्टबीजवत्कार्याजनन
सामर्थ्यमेव तस्याज्ञानेन क्रियते इति एतदाशयः तदुक्तमाचार्यैः सोयमित्यादिवाक्योत्थवि

ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः । तदाविद्या स्वकार्यैश्च नश्यत्येव न संशयः ५४

धातदि तं तयोत्पन्नेन भयायोरेक्यमाश्रयो लक्ष्यते यथा मायाविद्ये विहायैव उपाधी परजी
वयोः अखंडं सच्चिदानंदः परं ब्रह्मैव लक्ष्यते यथा सोयं देवदत्त इत्यादौ पूर्वानुभूतत्वरूपतत्ता
या इदानीमनुभूयमानत्वरूपेदंतायाश्च त्यागेन देवदत्तस्वरूपमात्रं लक्ष्यते मायाया हि समष्टि
रविद्याया व्यष्टिरूपत्वं बोध्यं श्रवणोत्तरज्ञानं मनननादिसंस्कृतांतःकरणादेव दृश्यते न यथा बुद्धी
तिस्मृतेः श्रुत्या मनननादिसंस्कृतया शास्त्राचार्योपदेशाशमदमादिसंस्कृतं मन आत्मदर्श
नकरणमिति गीताभाष्योक्तेश्चेति दिक् उक्तं च नारदीये तत्त्वमस्यादिवाक्योत्थज्ञानं मोक्ष ८
स्य साधनमिति श्रुतिरपि तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति ५४॥

ईदृशाज्ञानस्य सत्वे साधनमाह एतदिति मद्भक्त इति ऐतद्गर्भविशेषणं मद्भावे सत्याय
तेन भक्तेः कारणत्वं दर्शयन् भक्तिव्यतिरेके कार्यव्यतिरेकमाह मद्भक्तेति शास्त्रगर्तेषु शा
स्त्रबोधितक्रियाकलापरूपगर्तेषु ५१ ममात्मनः मद्रूपस्य चेतनस्य ५२ ५३ सर्ववेदा।

एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मु
ह्यतां न ज्ञानं न च मोक्षः स्याज्जन्मशतैरपि ५१ इदं रहस्यं हृदयं ममात्मनो
मयैव साक्षात्कथितं तवानघ मद्भक्तिहीनाय शठाय न त्वया दातव्यमैन्द्रादपि
राज्यतोधिकं ५२ श्रीमहादेव उवाच एतत्तेभिहितं देवि श्रीरामहृदयं मया
अतिगुह्यतमं हृद्यं पवित्रं पापशोधनं ५३ साक्षाद्रामेण कथितं सर्ववेदान्त
संग्रहं यः पठेत्सततं भक्त्या स मुक्तो नात्र संशयः ५४ ब्रह्महत्यादिपापानि
बहुजन्मार्जितान्यपि नश्यन्त्येव न संदेहो रामस्य वचनं यथा ५५ योतिभ्र
ष्टोतिपापी परधनपरदारेषु नित्योद्यतो वा स्तेयी ब्रह्मघ्नमातापितृवधनि
रतो योगिवृंदापकारी यः संपूज्याभिरामं पठति च हृदयं रामचंद्रस्य भक्त्या यो
गीन्द्रैरप्यलभ्यं पदमिह लभते सर्वदेवैः सपूज्यं ५६ इति उमामहेश्वरसंवादे अध्या

त्मरामायणे श्रीरामहृदयंनाम प्रथमोध्यायः १

त्मप्रतिपाद्यार्थसारसंग्रहरूपं ५४ ५५ अतिभ्रष्टत्वोपपादकमतिपापीत्यादि सर्वदे
वैः पूज्यं पदं ब्रह्मलोकं स लभत इत्यन्वयः ५६ इति श्रीमत्सकलराजन्यपदद्वंद्वारुणसमा
र्थेत्यादि विरुदावलीविराजमानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतौ अध्या।

त्मरामायणसेतौ बालकांडे प्रथमोध्यायः १॥

श्री
अ रा
बा टी
८

अथ पार्वती शिवोक्तमर्थं नंदति धन्यास्मीति अतिसंदेहग्रंथिः यदि रामपरं ब्रह्म तर्
हिं कथं तस्य शोकादि यदि शोकादि मत्वा जीवः कथं तदोपास्यत्वमित्याकारो महान्सं
देहरूपा ग्रंथिः विछिन्न इत्यर्थः १ भवः संसारस्तमपहंति नाशयति तादृशं रामे तत्वामृ

पार्वत्युवाच धन्यास्म्यनुगृहीतास्मि कृता
र्थास्मि जगत्प्रभो विछिन्नो मेतिसंदेहग्रंथि
र्भवदनुग्रहात् १ त्वन्मुखाद्गलितं रामतत्वा
मृतरसायनं पिबंत्या मम मनो देव न तृप्यति भवा
पह २ श्रीरामस्य कथा त्वत्तः श्रुता संक्षेप
तो मया इदानीं श्रोतुमिच्छामि विस्त
रेण स्फुटाक्षरम् ३ ॥ ॥

तरसायनं रामतत्वरूपामृतजनकमोदजनकं रसायनं पिबन्त्या मे मनो न तृप्यति ८
२ पुनर्विस्तरेण रामकथा पृच्छति श्रीरामस्येति स्फुटाक्षरमिति क्रियाविशेषणं ३

अथ महादेवस्तां कथां विवक्षुस्तत्र श्रोतृप्रवृत्तये तत्फलं तावदाह शृण्विति आत्मविदित अध्यात्म
सर्वात्मसत्त्वं तत्त्वं तयासि तयास्थितस्य रामस्य चरितं ततस्तद्गुणाननुरूपकाव्यं ४ तापत्रयं अध्यात्मि
काधिभौतिकाधिदैविकाख्यदुःखत्रयं तत्राद्यं रोगादिजं कामक्रोधादिजं द्वितीयं चौरादि
निमित्तं तृतीयं ग्रहपीडादिनिमित्तं ५ कथां शृणोति भूमिर्विवर देवगणान्नो भारेण

श्रीमहादेव उवाच शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत्
अध्यात्मरामचरितं रामेणोक्तं पुरा मम ४ तदद्य कथयिष्यामि
शृणु तापत्रयापहं यच्छ्रुत्वा मुच्यते जन्तुरज्ञानोत्थमहाभयात्
प्राप्नोति परमामृद्धिं दीर्घायुः पुत्रसन्ततिं ५ भूमिर्भारेण मग्ना द
शावदननमुखाघौघवद्दानवानां धृत्वा गोरूपमादौ दिविजमु
निजनैः साकमब्जासनस्य गत्वा लोकं रुदन्ती व्यसनमुपगतं
ब्रह्मणे प्राह सर्वं ब्रह्मा ध्यात्वा मुहूर्तं सकलमपि हृदावेदयो ६

भूमिः भाराधारजले मग्ना गोरूपं धृत्वा देवादिभिः सहाब्जासनस्य ब्रह्मणो लोकं गत्वा ब्रह्मणे उ
पगतं स्वयं प्राप्तं सर्वं व्यसनं प्राह स च मुहूर्तं ध्यात्वा सकलं दुःखकारणं तन्निवृत्तिकारणं
च हृदावेत् अजानात् तत्र हेतुः अपरोक्षात्मकत्वात् सर्वसमष्टिरूपत्वात् इत्यर्थः ६

श्री.
भ.रा.
बा.टी.
१९

तस्मादिति अनंतरमिति शेषः तदनंतरं ध्यानानंतरमित्यर्थः देव्या च भूम्या च सहित इति
शेषः अखिललोकस्य त्रस्य सर्वांतर्यामिनामित्यर्थः सर्वाण्येवात्मा इति श्रुतेः अजरं एष
महतात्मा जर इति श्रुतेः सर्वज्ञं यः सर्वज्ञः सर्वविदिति श्रुतेः ईशं एष सर्वेश्वर इति श्रुतेः

तस्माज्जीवसमुद्रतीरमगमद्ब्रह्मास्तु देवैर्वृतो देव्या चाखिललोकपालस्य मजरं
सर्वज्ञमीशं हरिं भूत्वा श्रुतिसिद्धनिर्मलपदैः स्तोत्रैः प्रणामोऽस्तु वै भक्त्या गद्गद
याभ्यो गीर्भिर्विमलैः तानं देवाश्च वृतः ७ ततः स्फुरत्सहस्रांशुसहस्रसदृशप्र
भः आविरासीद्धरिः प्राच्यां दिशां व्यपनयन्तमः ८ कथंचिद्दृष्टवान्ब्रह्मा
उद्दंधामकृतात्मना इन्द्रनीलप्रतीकाशं स्मितास्यं पद्मलोचनं ९ किरीटहा
रकेयूरकुण्डलकटकादिभिः विभ्राजमानं श्रीवत्सकौस्तुभप्रभयान्वितं १०
लवद्भिः सनकाद्यैश्च पार्षदैः परिवेष्टितं शंखचक्रगदापद्मवनमालाविराजितं ११

हरिं हरामयं हि संसारं तेनाहं हविर्भागं क्रतौ तथा वर्णोऽस्मि मे हरिरियं तस्मात्तस्माद्धरिरहं स्मृत
इति स्मृतेः श्रुतिसिद्धनिर्मलहरिविलस्य भूतपदस्तोत्रैः प्रणामोऽस्तु वै स्तोत्रैरित्यर्थः भ
क्तिनम्रलिकेवव गद्गदवाणीभिर्भक्तिजिताद्देवानां देवा गीर्भिर्विमलैः ७ सहस्रांशुस
हस्रसदृशप्रभः ८ अकृतात्मनां ज्ञानहीनानां तेजोराशिं नाकथंचिद्दर्शनं ९ १० पार्षदाः

१९

स्वर्णवर्णावरंयीतांवरं १२ १३ प्राणाः क्रियाशक्तिप्रधानोंशः तेन कर्मेन्द्रियसंग्रहः बु
द्धीन्द्रियाणि श्रोत्रादीनि आत्मा मनस्तैः करणभूतैर्नतोस्मि कर्मपाशान्मम त्वमिर्यत पदं हृ
दि चिन्त्यते इत्यन्वयः १४ गुणमय्या सत्वरजस्तमोगुणप्रपञ्चया मायया सविवया जगत्सृ
जसि तेन सृष्टिवाहिनातेलोपाः हे स्वेष्टत्वाद्यभिमानेन तत्र हेतुगर्भविशेषणं आनंदात्म

स्वर्णयज्ञोपवीतेन स्वर्णवर्णांवरेण च ॥ श्रिया भूम्या च सहितं गरुडोपरि सं
स्थितं हर्षगद्गदया वाचा स्तोतुं समुपचक्रमे १३ ब्रह्मोवाच नतोस्मि ते पदं दे
व प्राणबुद्धीन्द्रियात्मभिः यच्चिन्त्यते कर्मपाशाद्धृदि नित्यं मुमुक्षुभिः १४ मा
यया गुणमय्या त्वं सृजस्यवसि लुंपसि जगत्तेन न ते लेप आनंदात्मभवात्मनः
१५ तथा शुद्धिर्नदुष्टानां दानाध्ययनकर्मभिः शुद्धात्मनां ते यशसि सदा भक्ति
मतां यथा १६ अतस्त्वां विश्वमेकं मुक्ष्वितदोषापनुत्तये स्वधांतर्हृदये नित्यं मु
निभिः सात्वतैर्हितः १७ ॥

भवात्मनः आनंदाभिन्नात्म भवरूपआत्मा यस्य तस्य एवं व
स्तु स्वरूपापरोक्षेण सर्वत्र मिथ्यात्वज्ञानात दभिमानरहित इति भावः १५ दुष्टानां मलिना
त्मः करणानां शुद्धात्मता शुद्धान्तःकरणानां ते यशसि गुणकीर्तने १६ सात्वतैर्भक्तैर्हृ
तौ नर्हृदये स्वधा टश्लात्वां वाञ्छर्मे चित दोषापनुत्तये स्मितिशेषः १७ ॥ ॥ ॥ ॥

श्री
अ रा स्वार्थसिद्ध्यर्थं स्वकर्तव्यत्वेन स्वप्नादिसिद्ध्यर्थं ज्ञानिभिः ज्ञानेच्छुभिः १८ सपत्निवत् आश्रयो हृदयः
बा टी सपत्नीवदित्यर्थः १९ यतः स्वचरणाभक्तेषु त्वल्लक्ष्मीतोऽप्यधिका भक्तिः प्रीतिर्यतः सारवेदिन
२० स्त्वद्भक्ताः स्वचरणयोर्भक्तिमेवाभिवाञ्छन्ति २० अत इति यतस्ते भक्तिरेव संसाररोगभेषजं अत

ब्रह्माद्यैः स्वार्थसिद्ध्यर्थमस्माभिः पर्युपासितः अपरोक्षानुभूत्यर्थं ज्ञानिभिर्हृदि भा
वितः १८ तवाङ्घ्रिपूजानिर्माल्यतुलसीमालया विभो स्पर्द्धते वक्षसि पदं लब्ध्वापि श्री
सपत्निवत् १९ अतस्त्वत्पादभक्तेषु तव भक्तिः श्रियोऽधिका भक्तिमेवाभिवाञ्छन्ति
त्वद्भक्ताः सारवेदिनः २० अतस्त्वत्पादकमले भक्तिरेव सदास्तु मे संसाराम
तप्तानां भेषजं भक्तिरेव ते २१ इति ब्रुवन्तं ब्रह्माणं बभाषे भगवान् हरिः किं करो
मीति ते वेधाः प्रत्युवाचातिहर्षितः २२ भगवन् रावणो नाम पौलस्त्यतनयो
महान् राक्षसानामधिपतिर्मद्दत्तवरदर्पितः २३ त्रिलोकीं लोकपालांश्च बाधते
विश्वबाधकः मानुषेण मृतिस्तस्य मया कल्याणकल्पिता अतस्त्वं मानुषो भूत्वा

इत्यन्वयः २१ ब्रह्माणं हरिः किं करोमीति बभाषे अथ तं हरिं वेधाः प्रत्युवाचेति संबंधः २२ ।
रावण इति रावयामास लोकान् यतस्माद्रावण उच्यते इति भावः तोक्तेः माया ब्रह्मणा दत्ते
न वरेण दर्पितो हृष्टः तः वरश्च मनुष्यान् विना वध्यत्वरूपः २३ तदेवाह मानुषेणेति २४ २०

कश्यपस्य तपसा तोषितेन मे मया तस्मै वरो दत्तः यत्त्वं याचिष्यसि तत्तुभ्यं दास्यामीति कृ
तवरदानप्रतिज्ञ इत्यर्थः ततस्तेनाहं पुत्रभावाय याचितो मया च तत्तथेत्यंगीकृतमित्य
र्थः २५ अहं तस्य पुत्रतामेत्य पुत्रतां प्राप्स्यामीति संकल्प्य कौशल्यायामितरयोः सुमित्रा।
कैकेय्योरहमेवात्मानं च तद्धा चतुःप्रकारावयवसंस्थानैः रामलक्ष्मणभरतशत्रु।

श्रीभगवानुवाच कश्यपस्य वरो दत्तस्त
पसा तोषितेन मे याचितः पुत्रभावाय तथे
त्यंगीकृतं मया २५ स इदानीं दशरथो भूत्वा तिष्ठ
ति भूतले तस्याहं पुत्रतामेत्य कौशल्यायां शुभे दिने
२६ चतुर्धात्मानमेवाहं सृजामीतरयोः पृथक् यो
गमायापि सीतेति जनकस्य गृहे तदा २७ उत्पत्स्य
ते तया सार्द्धं सर्वं संपादयाम्यहं २८ इत्युक्त्वांत
र्दधे विष्णुर्ब्रह्मा देवानथाब्रवीत् विष्णुर्मा

घ्नेति चतुःप्रकारनाम भिस्तु सृजामि त्वत्या
सि वर्तमानमानसामीप्ये लट् २६ २७ योगमायेति योगो मत्संकल्पस्तद्वशवर्तिमायेत्यर्थः ना
हं प्रकाशः सर्वस्य योगमायासमावृत इति गीतोक्तेः तया सार्द्धं तां समाहृत्य कार्याणि प्राप्य २८ २९

श्री० अ० रा० बा० टी० २१

ऽप्सरासंभवान् ऋक्षाणासंभवान् वानरानित्यर्थः ३० ३१ इतस्ततः पर्वतवनेषु ३२ ३३

स्वयंसृजध्वं सर्वेपि वानरेष्वप्सरासंभवा
न् विष्णोः सहायं कुरुत यावत् स्थास्यति
भूतले ३० इति देवान्समादिश्य समाश्वास्य
च मेदिनी ययौ ब्रह्मा स्वभवनं विज्वरः सुखमा
स्थितः ३१ देवाश्च सर्वे हरिरूपधारिणः स्थिताः
सहायार्थं मितस्ततो हरेः महाबलाः पर्वतवृक्ष
दायोधिनः प्रतीक्षमाणा भगवन्तमीश्वरं
३२ इति श्रीमदध्यात्मरामायणे उमामहे
श्वरसंवादे बालकाण्डे द्वितीयो
ऽध्यायः २ रामायन
मो नमः॥

इति श्रीमत्सकलताविपदुहरणामर्थमन्त्यादिविरुदावलीविराजमानस्य हिम्मतिव
र्मणः पुत्रस्य श्रीरामवर्मणः कृतौ अध्यात्मरामायणसेतौ बालकाण्डे द्वितीयोऽध्यायः २ २१

अथरामादिजन्ममाहात्म्येति १ २ सर्वदुःखायेतिमनुष्यलोकः पुत्रैर्लोकजयोनान्येन
कर्मणेतिश्रुते ३ ४ शांताभर्तारं शांतालोमपाददशरथस्यांगपतेरेतद्दशरथमित्र

श्रीमहादेवउवाच अथराजादशरथः श्रीमान्सत्यपरायणः अयो
ध्याधिपतिर्वीरः सर्वलोकेषुविश्रुतः १ सोनपत्यतदुःखेनपीडितोग्र
तमेकदा वसिष्ठंस्वकुलाचार्यमाहूयेदमभाषत २ स्वामिन्पुत्राः
कथंमेस्युः सर्वलक्षणलक्षिताः पुत्रहीनस्यमेराज्यंसर्वदुःखायक
ल्पते ३ ततोब्रवीद्वसिष्ठस्तंभविष्यंतिसुतास्तव चत्वारः सत्वसंप
न्नालोकपालाइवापराः ४ शांताभर्तारमानीयऋष्यशृंगंतपोधना
ने अस्माभिः सहितः पुत्रकामेष्टिंशीघ्रमा
चर ॥५॥ रामः

स्वकन्यानेनराज्ञानतोलब्धाखंडहितत्वेनकल्पितेत्याख्यायिकापुत्रकामस्य कर्तव्ये
ष्टिः पुत्रकामेष्टिः ५ ॥ ॥

श्री· अ रा· बा टी· २२

मुनिं ऋष्यशृंगं मंत्रिभिर्वसिष्ठाद्यैः ९ तप्तजांबूनदं हृतमन्नापहरणं स्वर्णां तदन्नां तिहुंव्यवा
डुभिः अयमेव प्राजापत्यं नरैर्विहितमाभिहाभ्यां गतं न पेतिवाल्मीकीये प्राजापत्यपाहेनो
नः ७ पुत्रीयं पुत्रायहिते ८ मुनिपाहलौ वसिष्ठऋष्यशृंगौ ४ ९ जरणभुः भूपातदि

तथेति मुनि मानीय मंत्रिभिः सहितं शुचि यज्ञकर्म समारेभे मुनिभि
वीतकल्मषैः ९ श्रद्धया हूयमानेग्नौ तप्तजांबूनदप्रभः पायसं स्वर्णपा
त्रस्थं गृहीत्वोवाच हव्यवाट् ७ गृहाणपायसं दिव्यं पुत्रीयं देवनिर्मितं
लप्स्यसे परमात्मानं पुत्रत्वेन न संशयः ८ इत्युक्त्वा पायसं दत्वा राज्ञे सो
तर्दधेनलः ववंदे मुनिपाहलौ राजा लब्धमनोरथः ९ वसिष्ठऋ
ष्यशृंगाभ्यामनुज्ञातो ददौ हविः कौशल्यायै स कैकेय्यै अर्धं मर्धं प्रय
त्नतः १० ततः सुमित्रा संप्राप्ता जरणभुः पौत्रिकं चरुं ११॥

छावती श्रुथ प्रभिकांतायामित्यन्तोयं ऽलवांतादागमशास्त्रानित्यत्वेन तगाभावे त्रसि शुधि
दृषितिपः कृतितिक्रो हूयमाने पौत्रिकं चरुमिति षष्ठभावः अर्थःपुत्रः प्रयोजनमस्य तादृशं व २२

स्वभागार्द्धं स्वभागश्च आत्मीयवाचीस्वीयस्वभागः स्वभागात्तदर्द्धं स्वदत्तस्य चतुर्थोभागइत्य
र्थः एवमग्रेपि वाल्मीकीयेपि कौशल्यायै नरपतिः पायसार्द्धं ददौ तदा अर्द्धादर्द्धं द-
दौ चापि सुमित्रायै नराधिपः कैकेय्यै चावशिष्टार्द्धं ददौ पुत्रार्थकारणात् प्रददौ चाव-
शिष्टार्द्धं पायसस्यामृतोपमम् अनुचिन्त्य सुमित्रायै पुनरेव महामतिरिति श्लोकयोः कौ-
शल्यायै दत्तार्द्धादर्द्धं चतुर्थांशरूपं सुमित्रायै ददौ कौशल्यया दापितवानित्यर्थः कार्यः
अर्द्धादित्यत्र कस्यार्द्धादित्याकांक्षायामुपस्थितकौशल्यादत्तपायसार्द्धान्वयस्यौचित्या

कौशल्यातु स्वभागार्द्धं ददौ तस्यै मुदान्विता कैकेयी च स्वभागा-
र्द्धं ददौ प्रीतिसमन्विता उपभुज्य चरुं सर्वाः स्त्रियो गर्भसमन्विताः
१२

त अंतर्भावितण्यर्थस्य मानं चैतदेकवाक्यतैव एवं कैकेय्यै कौशल्यादत्तार्द्धादवशि-
ष्टमर्द्धं ददौ ततः कौशल्यादत्तावशिष्टस्य कैकेय्यै दत्तस्य यदर्द्धं तदर्द्धं विचार्य पुनरपि सु-
मित्रायै ददौ दापयामासेत्यर्थः अत्र चार्द्धायदाहृतिर्बोध्या एवं हि यत्नद्वयेन तस्यैकवाक्य-
ताभवति ततश्च भरतजनन्याः स्वतन्त्राधीनतौचित्येन एवमेवोचितं सेव्यसेवकभाव
लाभार्थं ततस्तत्तान्यनोपात्तस्य लक्ष्मणशत्रुघ्नयोरविनाभावः तत्स्वभागार्द्धमिति यथा
कृतं न व्याख्यातं कालिदासोपि सतेजो वैष्णवं पत्न्यौ विभेजे चरुसंज्ञितं १२ ॥ ॥ ॥

श्री
प्र.रां.
बा.टी.
२३

